श्रिता । ततः शनैः शनैरेव रेचयेन्न च वेगतः । इदं खलु महामुद्रा महासिद्धैः प्रशस्यते । महाक्लेशादयो दोषाः क्षीयन्ते मरणादयः । महामुद्रां तेनैव वदन्ति विबुधोत्तमाः । चन्द्राङ्गे च समभ्यस्य सूर्य्याङ्गे पुनरभ्यसेत् । यावत्तुल्या भवेत् संख्या ततो मुद्रां विसर्जयेत् । न हि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः । अपि भुक्तं विषं घोरं पीयूषमिव जीर्य्यति । क्षयकुष्ठगुदावर्त्तगुल्माजीर्णपुरोगमाः । दोषाः सर्वे क्षयं यान्ति महामुद्रां च योऽभ्यसेत् । कथितेयं महामुद्रा महासिद्धिकरी नृणाम् । गोपनीया प्रयत्नेन न देया यस्य कस्यचित्" हठप्र० ।

महाबन्धः २ "पार्ष्णिं वामस्य पादस्य योनिस्थाने नियोजयेत् । वामोरूपरि संस्थाप्य दक्षिणं चरणं तथा । पूरयित्वा ततो वायुं हृदये चिबुकं दृढम् । निष्पीड्य योनिमाकुञ्च्य मनोमध्ये नियोजयेत् । धारयित्वा यथाशक्ति रेचयेदनिलं शनैः । सव्याङ्गे पूर्वमभ्यस्य दक्षाङ्गे पुनरभ्यसेत् । मतान्तरे तु केषाञ्चित् कण्ठबन्धं विवर्जयेत् । राजदन्तस्य जिह्वायां बन्धः शस्तो भवेदिति । अयं खलु महाबन्धो महासिद्धिप्रदायकः । कालपाशमहाबन्धविमोचनविचक्षणः । अयं च सर्वनाडीनामूर्द्ध्वगमनरोधकः । त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः । रूपलावण्यसम्पन्ना यथा स्त्री पुरुषं विना । महामुद्रामहाबन्धौ निःफलौ वेधवर्जितौ" हठप्र० ।

महावेधः ३ "महाबन्धे स्थितो योगी कृत्वा पूरकमेकधीः । वायुना गतिमावृत्य निभृतं कण्ठमुद्रया । समहस्तयुगो भूमौ स्फिचौ सन्ताडयेत् शनैः । पुटद्वयं समाक्रम्य वायुः स्फुरति मध्यगः । सोमसूर्य्याग्निसम्बन्धात् जायते च मृतिक्षयः । मृतावस्था समुत्पन्ना ततो मृत्युभयं कुतः । महावेधोऽयमभ्यासान्महासिद्धिप्रदायकः । वलीपलितनिर्घ्नैः सेव्यते साधकोत्तमैः । एतत् त्रयं महागुह्यं जरामृत्युविनाशनम् । वह्निवृद्धिकरं चैवमणिमादिगुणप्रदम् । अष्टधा क्रियते चैव यामे यामे दिने दिने । पुण्यसम्भारसन्धायि पापौघभिदुरं सदा । सम्यक् शिक्षावतामेव स्वल्पं प्रथमसाधनम् । वह्निस्त्रीपथसेवानामादौ वर्ज्जनमाचरेत्" हठप्र० ।

खेचरी ४ "छेदनचालनदोहैः जिह्वां क्रमेण वर्द्धयेत्तावत् । यावद्भ्रूमध्यं स्पृशति तदा च खेचरीसिद्धिः । स्नुहीपत्रनिभं शस्त्रं सुतीक्ष्णं स्निग्धनिर्मलम् । समादाय ततस्तेन रोममात्रं समुच्छिदेत् । कृत्वा सैन्धवपथ्यादिचूर्णं ताभ्यां प्रघर्षयेत् । पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिदेत् । एवं क्रमेण षण्मासं नित्ययुक्तं समाचरेत् । षण्मासात् रसनामूलनाडीबन्धो विनश्यति । अथ वागीश्वरीधामशिरोवस्त्रेण वेष्टयेत् । शनैरुत्कर्षयेद्योगी कालवेलाविधानवित् । वितस्तिप्रमितं दैर्घ्ये विस्तारे चतुरङ्गुलम् । मृदुलं धवलं प्रोक्तं वेष्टिताम्बरलक्षणम् । पुनः षण्मासमात्रेण पुनः सङ्कर्षणात् प्रिये ! । भ्रूमध्यावधि वर्द्धेत तिर्य्यक् कर्णबिलावधि । अधस्तात् चिबुकं मूलं प्रयाति क्रमचारिता । केशाद्ध्वन्तु क्रामति तिर्य्यक्शङ्खावधि प्रिये ! । पुनः संवत्सराद्देवि ! द्वितीया चैव लीलया । ब्रह्मरन्ध्रान्तमावृत्य तिष्ठत्यमरवन्दिते ! । स्वतालुमूलं सञ्चूष्य सप्तवारमतन्द्रितः । अङ्गुष्ठक्रमकारेण मलं सर्वं विशोधयेत् । अङ्गुल्यग्रेण सञ्चूष्य जिह्वां तत्र निवेशयेत् । शनैः शनैर्मस्तकान्तं महावज्रकपाटभित् । पूर्वबीजयुतां विद्यां व्याख्यातामतिदुर्लभाम् । तस्याः षडङ्गं प्रकुर्वीत तया षट्चक्रभिन्नया । खे निरस्तसमस्तक्रियाक्रमा चित्ततत्सरति शाश्वतोदरे । सा शिवत्वसमवायकारिणी खेचरी च भवखेदहारिणी । क्रमेणैव प्रकर्षव्याऽभ्यासेन वरवर्णिनि ! । युगपद्युतते तस्य शरीरं विलयं व्रजेत् । तस्मात् शनैः शनैः कार्य्यमभ्यासं युगवत् प्रिये ! । एवं वर्षत्रयं कृत्वा ब्रह्मद्वारं विशेद् ध्रुवम् । षट्चक्राणि विभिद्य शक्तिभुजगीं प्रोत्थाप्य मूलस्थितां भित्त्वा ग्रन्थिपुटं च पश्चिमसिराप्राकारकूपं सकृत् । नीत्वा प्राणमतः सिराविवरगं निर्मथ्य चित्तेन तत् लिङ्गं यः पिबतीन्दुमण्डलगलत् सूक्तः स साक्षात् शिवः" । "तीक्ष्णकं हरते व्याधिं कटुकं कुष्ठनाशनम् । घृतस्वादूपमं चैवामरत्वं लभते ध्रुवम् । मधुस्वादूपमं चैव शालिमुद्गादिकं बहु । लड्डुकस्वादुकपानानि पक्वान्नानि ह्यनेकशः । दिव्यकल्पं क्रीडित्वा सुतृप्तो जायते ध्रुवम् । तन्मयत्वमवाप्नोति कोषकारीव कीटकः । कपालकुहरे जिह्वा प्रविष्टा विपरीतगा । भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी । काकचञ्चुविधानेन शीतलं सलिलं पिबेत् । प्राणापानप्रयोगे च योगी भवति निर्जरः । कलां पराङ्मुखीं कृत्वा त्रिपथे परिवर्त्तयेत् । सा भवेत् खेचरी मुद्रा व्योमचक्रं तदुच्यते । रसनामूर्द्ध्वगां कृत्वा क्षणार्द्धं यदि तिष्ठति । विषैर्विमुच्यते योगी व्याधिमृत्युजरादिभिः । न रोगो